# M.A. 3rd Semester Examination, 2024

## SANSKRIT

## PAPER—SAN-302(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## GROUP – A

### (*Literature*)

1. यथानिर्देशमुत्तरं दीयताम्— 10

(क) उत्तरे रामचरिते भवभूतिर्विशिष्यते– इति उक्तेः सार्थकता सोदाहरणं प्रदर्श्यताम् ।

( *Turn Over* )

*अथवा*

'उत्तररामचरितम्' इति नाटकस्य तृतीयाङ्कस्य विषयम् आलोच्य तत्रत्यं नाटकीयमहत्वं प्रतिपाद्यताम् ।

(*ख*) 'रत्नावली' इति नाटिकायाः प्रथमाङ्कसारः स्वकीयया भाषया लिख्यताम् । 10

*अथवा*

रत्नावलीमनुसृत्य राज्ञः उदयनस्य चारित्रिकं वैशिष्ट्यमुपपाद्यताम् ।

2. यथानिर्देशमुत्तरं दीयताम्—

(क) कयोश्चिद् द्वयोः व्याख्या कार्या– 5×2

(*i*) सर्वथेदानीं त्वत् प्रसूतिमुपस्थास्यन्ति ।

(*ii*) स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।।

(*iii*) वज्रादपि कठोराणि मृदुनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ।।

(ख) कयोश्चिद् द्वयोः व्याख्या कार्या– 5 × 2

(i) पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ।।

(ii) प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवेनेत्थं दत्तहस्तावलम्बे ।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाचारी भीत एवास्मि भर्तुः ।।

(iii) अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवौ,
आस्थानीं समये समं नृपजनः सायन्तने सम्पतन् ।
सम्प्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ।।

**[ Internal Assessment — 10 Marks ]**

## GROUP – B

## (*Paniniya Vyakarana*)

**सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः**

1. प्रश्नद्वयं समाधेयम्— 10 × 2

(क) अपादानस्वरूपं समासतो निरूपणीयम् ।

*अथवा*

किं नाम करणम् ? करणविधायकं प्रधानं सूत्रं किम् ? तत्र सूत्रे तमब्ग्रहणं यथार्थं न वेति पतञ्जलेराशयः स्पष्टीक्रियताम् ।

(ख) को नाम प्रत्याहारः ? प्रत्याहारः किमर्थम् ? र–प्रत्याहारः केन प्रकारेण सिध्यति ? तत्स्वीकारे काशिकामतं पर्यालोच्यताम् ।

*अथवा*

'हयवरट्'—इति सूत्रस्य तात्पर्यं व्याख्येयम् ।

2. यथेच्छं प्रश्नद्वयं समाधेयम्— 5 × 2

(क) कारके इति संज्ञारूपाधिकारस्य संज्ञिनोऽनुल्लेखे का क्षतिः ?

(ख) अथवा यायद् ब्रूयात् कियायामिति ।

(ग) क्रियापि कृत्रिमं कर्म–सप्रसङ्गमालोच्यताम् ।

3. यथेच्छं द्वयोर्व्याख्या कार्या — 5 × 2

(क) वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ।।

(ख) ऐ औ च् ।

(ग) प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन ।

**[ Internal Assessment — 10 Marks ]**

GROUP — C

*(Indian Philosophy)*

**सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः**

**क–विभाग**

1. एकः प्रश्न समाधेयः — 10

(क) संशयादीनां पदार्थानां पृथगुल्लेखे किं कारणम् ?— सविस्तरमालोच्यताम् ।

(ख) किं नामानुमानम् ? तत् कतिविधम् ? सोदाहरणं प्रत्येकं प्रकार आलोच्यताम् ।

2. द्वयोर्व्याख्या कार्या — 5×2

(क) निर्देशे यथावचनं विग्रहः ।

(ख) आप्तोपदेशः शब्दः ।

(ग) तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् ।

3. एकः प्रश्न समाधेयः — 10

(क) भाषापरिच्छेदशब्दस्य कोऽर्थः ? तस्य कर्ता कः ? तन्मते अनुमायां को व्यापारः किं वा करणम् ? ज्ञायमानं लिङ्गं करणं भवितुमर्हति न वा विचार्यताम् ।

(ख) व्याप्तेः पूर्वलक्षणं किम् ? तस्य परित्यागे को हेतुः ? — सविशदमालोच्यताम् ।

4. द्वयोर्व्याख्या कार्या — 5×2

(क) इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलमुखगौरवस्यादोषत्वात् ।

(*ख*) साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः ।

(*ग*) येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् ।

**[ Internal Assessment — 10 Marks ]**

---